# Samskriti-Gitika (The Song of Culture)

# संस्कृति-गीतिका

## Document Information

Text title : Samskriti Gitika (The Song of Culture)

File name : saMskRRitigItikA.itx

Category : misc, sanskritgeet, hkmeher

Location : doc_z_misc_general

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Sanskrit G□ti-K□vya ‘Pushp□□jali-Vicitr□’

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : October 31, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2023

*sanskritdocuments.org*

Samskriti-Gitika (The Song of Culture)

# संस्कृति-गीतिका

विजयतेतराम्, ॐकार-भारती, संस्कार-भारती ।
शुचि-वर्णम्, अन्तःकरणम्,
भुवि भव्या प्रतिभा विभास्वती ।
विजयतेतराम्, ॐकार-भारती, संस्कार-भारती ॥ (ध्रुवम्) ॥

गुण-समुज्ज्वला सौम्या सुजला भारत-जननी ;
वैभव-पूर्णा मधुराभरणा भुवन-पावनी ।
सुनिर्मला, रम्योर्मि-चला,
इह गङ्गा यमुना सरस्वती ।
विजयतेतराम्, ॐकार-भारती, संस्कार-भारती ॥ १ ॥

विश्व-विश्रुता श्रुतिरनवद्या विद्या सकला ;
चर्चित-विबुधा ललिता विविधा प्रिय-चारुकला ।
विराजते, निखिल-भारते,
परमार्या परम्परा महती ।
विजयतेतराम्, ॐकार-भारती, संस्कार-भारती ॥ २ ॥

सङ्गीत-सुधा सङ्गत-रङ्गा जन-मनोहरा ;
प्रसरति नित्यं नृत्य-माधुरी रस-रागभरा ।
चित्र-कला, सुपवित्र-फला,
प्रतिहृदयं प्रमुदं वितन्वती ।
विजयतेतराम्, ॐकार-भारती, संस्कार-भारती ॥ ३ ॥

शिव-सङ्कल्पा शिल्प-चातुरी वाङ्मयाङ्किता ;
स्थापत्य-दिशा मन्दिर-माला समभिनन्दिता ।
सुरञ्जिनी, ताप-भञ्जिनी,
चिर-सुभगा शुभ-कीर्त्ति-व्रतती ।
विजयतेतराम्, ॐकार-भारती, संस्कार-भारती ॥ ४ ॥

जीवन-धारा विगत-विकारा वहतु सौख्यदा ;
मानवताया ज्योति-र्दिव्यं लसतु सर्वदा ।
जागरणे, कर्माचरणे,
इह सुजनो महतां तपोव्रती ।
विजयतेतराम्, ॐकार-भारती, संस्कार-भारती ॥ ५॥

संहति-सूत्रा भारत-पुत्रा मैत्री-भरणे ;
शान्ति-भावना धार्या नियतं पर्यावरणे ।
मातृ-पदे, मङ्गलास्पदे,
प्रणति-र्नो नितरां भक्तिमती ।
विजयतेतराम्, ॐकार-भारती, संस्कार-भारती ॥ ६॥

– गीतरचना : डॉ हरेकृष्ण-मेहेरः

Copyright Dr.Harekrishna Meher

*Samskriti-Gitika (The Song of Culture)*
pdf was typeset on October 30, 2023

Please send corrections to *sanskrit@cheerful.com*